श्रीः

श्रीमते रामानुजाय नमः

अस्य श्रीशालिग्रामस्तोत्रमंत्रस्य भगवान् ऋषिः नारायणो देवता अनुष्टुप् छंदः । श्रीशालिग्राम स्तोत्रमंत्रजपे विनियोगः ।

युधिष्टिर उवाच।। श्रीदेवदेव देवेश देवतार्चन मुत्तमं। तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ।।१।। श्रीभगवानुवाच ।। गंडक्याश्चोत्तरे तीरे गिरिराजस्य दक्षिणे । दशयोजनविस्तीर्णा महाक्षेत्रं वसुंधरा ।।२।। शालिग्रामो भवेद्देवो देवी द्वारावती भवेत् । उभयोस्संगमो यत्र मुक्तिस्तत्र न संशयः ।।३।। शालिग्रामशिला यत्र यत्र द्वारावती भवेत् । उभयोस्संगमो यत्र मुक्तिस्तत्र न संशयः ।।४।। आजन्मकृत पापानां प्रायश्चित्तं य इच्छति । शालिग्राम शिलावारि पापहारि नमोस्तुते ।।५।। अकालमृत्युहरणं सर्वव्याधिविनाशनं । विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहं।।६।। शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि । अंगलग्नं मनुष्याणां





ब्रह्महत्यादिकं दहेत् ।।७।। स्नानोदकं पिबेन्नित्यं चक्रांकित शिलोद्भवं । प्रक्षाल्य इति तत्तोयं ब्रह्महत्यां व्यपोहति ।।८।। अग्निष्टोमसहस्राणि वाजपेयशतानि च । सम्यक्फलमवाप्नोति विष्णोर्नैवेद्यभक्षणात् ।।९।। नैवेद्ययुक्तां तुलसीं च मिश्रितां विशेषतः पादजलेन विष्णोः । योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुत कोटिपुण्यं ।।१०।। खंडिता स्फुटिता भिन्ना अग्निदग्धा तथैव च । शालिग्रामशिला यत्र तत्र दोषो न विद्यते ।।११।। न मंत्रः पूजनं नैव न तीर्थं नच भावना । न स्तुतिर्नोपचारश्च शालिग्राम शिलार्चने ।।१२।। ब्रह्महत्यादिकं पापं मनोवाक्काय संभवं । शीघ्रं नश्यति तत्सर्वं शालिग्राम शिलार्चनात् ।।१३।। नानावर्णमयं चैव नानाभोगेन वेष्टितं । तथा वरप्रसादेन लक्ष्मीकांतं वदाम्यहं ।।१४।। नारायणोद्भवो देवश्चक्रमध्ये च कर्मणा । तथा वरप्रसादेन लक्ष्मीकांतं वदाम्यहं ।।१५।। कृष्णे शिलातले यत्र सूक्ष्मं चक्रं च दृश्यते । सौभाग्यं संततिं धत्ते सर्वसौख्यं ददाति च ।।१६।। वासुदेवस्य

चिह्नानि दृष्ट्वा पापैः प्रमुच्यते । श्रीधरस्सुकरे वामे हरिद्वर्णस्तु दृश्यते ।।१७।। वाराह रूपिणं देवं कूर्मांगैरपि चिह्नितं । गोपदं तत्र दृश्येत वाराहं वामनं तथा ।।१८।। पीतवर्णस्तु देवानां रक्तवर्णं भयानकं । नारसिंहो भवेद्देवो मोक्षदं च प्रकीर्तितं ।।१९।। शंखचक्रगदाकूर्माः शस्त्रो यत्र प्रदृश्यते । शंखवर्णस्य वेदानां वामेदेवस्य लक्षणं ।।२०।। दामोदरं तथास्थूलं मध्येचक्रं प्रतिष्ठितं । पूर्णद्वारेण संकीर्णा पीतरेखा च दृश्यते ।।२१।। छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः । कपटे च महा दुःखं शूलाग्रेतु रणं ध्रुवं ।।२२।। ललाटे शेषभोगस्तु शिरोपरि सुकांचनं । चक्रकांचनवर्णानां वामदेवस्य लक्षणं ।।२३।। वामपार्श्वे च वै चक्री कृष्णवर्णस्तु पिंगलं । लक्ष्मी नृसिंहदेवानां पृथग्वर्णस्तु दृश्यते ।।२४।। बिंबोष्ठे च दरिद्रं स्यात्पिंगले हानिरेव च । लग्न चक्रे भवेद्व्याधिर्विदारे मरणं ध्रुवं ।।२५।। पादोदकं च निर्माल्यं मस्तके धारयेत्सदा । विष्णोर्दृष्टं भवितव्यं तुलसीदलमिश्रितं ।।२६।। कल्पकोटि सहस्राणि वैकुंठे वसते सदा । शालिग्रामशिला बिंदुर्हत्या





कोटिविनाशनं ।।२७।। तस्मात्संपूजयेत् ध्यात्वा पूजितं चापि सर्वदा । शालिग्रामशिला स्तोत्रं यः पठेच्च द्विजोत्तमः ।।२८।। स गच्छेत्परमं स्थानं यत्र लोकेश्वरो हरिः । सर्वपाप विनिर्मुक्तो विष्णुलोकं स गच्छति ।।२९।। दशावतारो देवानां पृथग्वर्णस्तु दृश्यते । ईप्सितं लभते राज्यं विष्णुपूजा मनुक्रमात् ।।३०।। कोट्यो हि ब्रह्महत्याना मगम्यागम कोटयः । तास्सर्वा नाशमायांति विष्णुनैवेद्य भक्षणात् ।।३१।। विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनं । तस्मादष्टगुणं पापं भूमौ बिंदुनिपातनात् ।।३१।।

इति शालिग्रामस्तोत्रं

मंडयं नायक रामानुज